॥ ॐ ॥

अस्तु तेजस्वि नोऽधीतमस्तु च ब्रह्मवर्चसम्।
सम्पादयेम हि सहः सह वीर्यं करवामहि ॥ ग ॥

स्तम्भं निर्भिद्य निर्यन्निरिव जगदघध्वान्तनाशावतीर्णं
पूर्णं स्वर्णोपमानद्युतिविहततमस्तोममस्तारिवर्गम्।
स्वस्ति श्रीमत् समस्तश्रुतिगदितमहो तन्महो नो विदध्यात्
पञ्चास्यं कन्दरायाः उपरि परिगतं देववृन्दैरमन्दैः ॥१॥

ॐ व्याघ्रेन्द्रक्रोडाभयदमरिदराद्यायुधोदग्रबाहुं
रुद्रं रुद्रेन्द्रमुख्यामरगणविनुतं भद्रविज्ञानमुद्रम्।
वीरं वीरासनस्थं भवभयहरणं दारुणं दारुणानां
रुक्षं त्र्यक्षं महोक्षं क्षपितदुरितमक्षोभणीयं दिदृक्षे ॥२॥

ज्वलत्कनकपिञ्जरं कलितभक्तहृत्पञ्जरं
चिरं मुदितनिर्जरं श्रुतिमहाटवीकुञ्जरम्।
भजे भुवनबन्धुरं हृदि निबोन्दिरामन्दिरं
परं तुरगकन्धरं दरधरं नृकण्ठीरवम् ॥४॥

जगन्निधानपिठरं नृहरेर्जठरं नुमः।
यन्नाभिकुहरोद्भूतस्तनयो हंसवाहनः ॥५॥

यदुत्सङ्गासङ्गा जगदुदयभङ्गाऽब्धितलया
यदुद्गीता गीता विषयविषभीतावनकरी।
सुधामुद्रा भद्रा दुरितगणविद्रावणकरी
नमस्तस्मै कस्मैचिदमरपुषे सिंहवपुषे ॥६॥

नरकेसरिणं धिक्कृतहिरण्यकरिणं च सूकरिणम्।
तोषितबुधजनहरिणं वरिणं दरिणं स्मरामि मन्दरिणम् ॥७॥

इममाचार्यवरोविन्दे सन्निधाय हरिस्तवम्।
रचयामासतुः प्रेम्णा प्राणनारायणौ स्वयम् ॥*॥